International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 128-129
© 2018 IJSR
www.anantaajournal.com
Received: 21-11-2017
Accepted: 24-12-2017

डॉ0 आशुतोष कुमार मिश्र
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीड़ा, पी.टी.सी., दरभंगा, बिहार, भारत

Corresponding Author:
डॉ0 आशुतोष कुमार मिश्र
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीड़ा, पी.टी.सी., दरभंगा, बिहार, भारत

# दूतकाव्ये पूर्वमेघदूतस्य स्थानम्

डॉ0 आशुतोष कुमार मिश्र

**प्रस्तावना**

संस्कृते खण्डकाव्यमत्याधुनिकाः गीतिकाव्यम् इति नाम्ना व्यपदिशन्ति। अत्र गीतिकाव्यप्रभेद एव दूतकाव्यमुक्तककाव्यवर्णन– प्रधानकाव्या न्यायान्ति, तेन खण्डकाव्यनामाऽयं प्रकारो मेघदूत– ऋतुसंहार– गीतगोविन्दभर्तृहरि– शतकत्रयामरुकशतकम् भामिनी– विलासयुगलश्रीगीतिमालिकादीन् अन्यान्यानि दूतकाव्यानि चाङ्गी– करोति।

शाङ्गर्ारिकगीतिकाव्यं हि प्रायः शृंङ्गारवर्णनपरमेव। यद्यपि तत्र सम्भवन्तीतरे प्रसङ्गागता विषया अपि तथापि तस्य मुख्यं प्रयोजनं तु शृंङ्गारजन्यानन्द एव। शाङ्गर्ारिकं हि गीतिकाव्यं दूतकाव्य– प्रस्तुतिकाव्यस्फुटकाव्यभेदेन त्रिविधं दृश्यते।

संस्कृतसाहित्ये दूतकाव्यपरम्पराऽतिप्राचीना। काव्यशास्त्रस्या द्याचार्यो भामहो निर्दिशति –

> अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः।
> तथा भ्रमरहारीतचक्रवाकशुकादयः।।
> अवाचोऽयुक्तवाचञ्च दूरदेशविचारिणः।
> कथ दूत्यं प्रपद्येरन् इति युक्त्या न युज्यते।। [1]

पुराकाले हि अद्यतनीनपत्रप्रेषणादिव्यवस्था नैवासीत्। तेन हि दूरदेशस्या वियोगिनः स्वावस्थाद्योतकं सन्देशं मेघ–वायु–चन्द्र–काक– शुक–पारावतादिभ्यः कथयित्वाऽपि सन्तोषं कुर्वन्ति स्म। न केवलं काव्येऽपि तु लोकेऽपि पारावतदौत्यघटना काकसन्देशहारिता च कर्णपरम्परया श्रूयते एव। लोकगीतेष्वपि एतादृशं वृत्तं बहुशो दृश्यते। इदमेव लोकवृत्तं काव्ये कवयो वदन्ति चमत्कारिण्या वाण्या। प्रकरणेऽस्मिन् वैदिकमन्त्रा अपि साक्षिणो भवन्ति। अप्रतिरथसूक्ते वायुः अगसैनिकत्वेन प्रयुक्तोऽस्ति। यथोक्तं तत्र–

> 'असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना।
> तां गूहत तमसाऽपव्रतेन यथाऽमी अन्योऽन्यं न जानन्।।'

वायुरिन्द्रस्य दूत इति सर्वत्र प्रसिद्धिः। परम्परामिमामनुसरन्ति कवयः काव्येषु कमनीयत्वेन। रामायणे हि हनुमान् रामेण दौत्ये नियुक्त इति दृश्यते तथैव रावणेन शुकः। कुमारसम्भवेऽग्निर्दौत्येन देवैः प्रहितो रुद्रस्य पार्श्वं गच्छति। महाभारते स्वयमेव श्रीकृष्णः पाण्डवानां दौत्यं करोति। इत्थं प्रचलितामेव परम्परामाश्रित्य तत्र –

> ''यदि चोत्कण्ठया यत्तदुन्मत्त इव भासते।
> तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते।।'' [2]

इति भामहीयकथनमनुसरन् कालिदासो मेघदूतं नाम गीतिकाव्यं प्रणयति। ततश्च प्रवर्तते लौकिकदूतकाव्यपरम्परा। मेघदूतमिन्दुदूतं मनोदूतं पवनदूतं हंसदूतं पिकदूतमित्यादिकाव्यानि कविभिः प्रणीतानि।

कालिदासस्य उज्जयिनीविशेषपक्षपातिनो मेघदूतं नाम गीतिकाव्यं स्वप्रकृत्यन्यकाव्यानि नितान्तमतिशेते। कथं मेघो हि निश्चेतनो दौत्ये प्रयुक्त इत्याकाङ्क्षानिवारणाय सः प्रथममेव कथयति –

> ''धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
> सन्देशार्थाः क्व पटफकरणैः प्राणिभिः प्रापणीयाः।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।। [3]

काव्यमिदं कालिदासस्य मनोक्रतमा कृतिर्यद्धि कविना स्वीयैर्हार्दिकभावैः पूरितम्। एतद्धि कवेर्मानवहृदयगतभावानां समग्राध्ययनस्य साक्षित्वेनास्ति। अत्र हि मानवहृदयं प्राकृतिकवस्तुना सह सम्बद्धं तथा कल्पितं यत्र न लेशमात्रमपि शङ्कावसरः। परिष्कृतवाचा कमनीयत्वेन गुम्फितोऽयं ग्रन्थो न कस्य सहृदयस्यामोदायैव भवति। काव्येऽस्मिन् व्यवहृता मन्दाक्रान्ता क्षेमेन्द्रेणेत्थं प्रशस्यते –

सदश्वदमकस्येव काम्बोजतुरगाङ्गना।। [ख4]

कुबेरस्य वर्षभोग्येन शापेन रामगिरिं परिव्राजितो यक्षः प्रावृट्काले गिरिशिखरं मेघाच्छन्नं दृष्ट्वा कान्तास्मृत्या विह्वलश्चेतना– चेतनेषु प्रकृतिकृपणः सन् प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी मेघद्वारेण प्रियायै सन्देशं हारयिष्यंस्तं सम्पूज्य नवैः पुष्पैः कथयितुमुपक्रमते। तत्कथने प्रथमं स मार्गनिर्देशनं करोति येन मेघेन गन्तव्यम्। तत्क्रमे क्रमेण माल–आम्रकूट–नर्मदादशार्ण–विदिशा–वेत्र–वती–नीलगिरि–निर्विन्ध्या– सिन्धु– अवन्ति– विशाला–उज्जयिनी। शिप्रा– गम्भीरा– देवगिरि– चर्मण्वती– दशपुर– ब्रह्मावर्त– कुरुक्षेत्र– सरस्वती– कन– खल– गङ्गानदी– हिमालय– क्रौञ्चरन्ध्र– कैलाश–मानससरोवर–अलकाश्च निर्दिष्टाः।

**संदर्भाः**


1. काव्यशास्त्रे पृ0सं0– 37 ।
2. महाभारते।
3. मेघदूतम्–2।
4. सुवृत्ततिलके– 3/34।